षड्विधं, त्रि, ( षट् विधाः प्रकारा यत्र । ) षट्प्रकारम् । यथा,—
"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥"
इति मुग्धबोधटीकायां दुर्गादासः ॥
अपि च ।
"तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः ॥"
इति भाषापरिच्छेदः ॥

षण्डः, पुं, (षणु दाने + "ञमन्तात् डः ।" उणा० १ । ११३ । इति डः । बहुलवचनात् सत्वाभावः ।) वृषभः । षाँड़ इति भाषा । तत्पर्य्यायः । गोपतिः २ इट्चरः ३ । इत्यमरः ॥ षण्ढः ४ शण्डः ५ शण्ढः ६ । इति शब्दरत्नावली ॥ क्लीवम् । इति जटाधरामरटीका ॥ समूहः । इति रुद्रः ॥ ( यथा, हरिवंशे । ३३ । ३२ ।
"नता निश्चलमूर्द्धानो बभूवुस्ते महोरगाः ।
सायाह्ने कदलीषण्डे कम्पितास्तस्य वायुना ॥")

षण्डः, पुं, क्ली, (षणु दाने + डः ।) पद्मादिकदम्बम् । पद्मकुमुदादिसमूहः । इत्यमरः । (यथा, माघे । ११ । १५
'कलरवमुपगीते षट्पदौघेन धत्तः
कुमुदकमलषण्डे तुल्यरूपामवस्थाम् ॥"
चिह्नम् । यथा, भागवते । ४ । १९ । २३ ।
"यानि रूपाणि जगृहे इन्द्रो हयजिहीर्षया ।
तानि पापस्य षण्डानि लिङ्गं खण्डमिहोच्यते ॥")

षण्डाली, स्त्री, तैलमानम् । कटाक् इति भाषा । सरसी । (षण्डेन वृषभवत् कामुकपुरुषेण अलति पर्य्याप्नोतीति । अल + अच् । गौरादित्वात् ङीष् ।) कामुकस्त्री । इति मेदिनी ॥ मुद्राङ्कितमेदिन्यां दन्त्यसकारादौ लिखिता ॥

षण्ढः, पुं, ( शाम्यति शिश्नाभावात् । शम + "शमेर्ढः ।" उणा० १ । १०१ । इति ढप्रत्ययेन साधुः ।) नपुंसकः । इति राजनिर्घण्टः हेमचन्द्रश्च ॥ स च चतुर्द्दशविधः विंशतिविधश्च । यथा नारदः ।
"परीक्ष्यः पुरुषः पुंस्त्वे निजैरेवाङ्गलक्षणैः ।
चतुर्द्दशविधः शास्त्रे षण्ढो दृष्टो मनीषिभिः ॥
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् ।
निसर्गषण्ढः वद्धश्च पक्षषण्डस्तथैव च ॥
अभिशापाद्गुरो रोगात् देवक्रोधात्तथैव च ।
ईर्ष्याषण्डश्च सेव्यश्च वातरेता मुखेभगः ॥
आक्षिप्तमोघबीजौ च शालीनोऽन्यापतिस्तथा ॥"
१४ ॥
कामतन्त्रे तु ।
"निसर्गषण्ढो वद्धश्च पक्षषण्डश्च कौलकः ।
शापादिषण्ढस्तश्चश्च ईर्षकः सेव्यकस्तथा ॥
आक्षिप्तमोघबीजौ च शालीनोऽन्यापतिस्तथा ।
मुखेभगा वातरेताः कुम्भीकः षण्डनष्टकौ ॥
आसेव्यश्च सुगन्धी च षण्ढः क्लीवानि विंशतिः ॥"
२० ॥
तेषां लक्षणानि यथा,—
"ध्वजादिरहितोत्पन्नो निसर्गषण्ढ उच्यते ।१।
गलिताण्डो भवेद्वद्धः २ पक्षान्तरितशक्तिमान् ॥
पक्षषण्ढः ३ कौलकस्तु यः क्लैव्यादात्मनः स्त्रियम् ।
परेण सह संयोज्य पश्चात्तामेव सेवते ॥ ४ ॥
शापादिषण्ढो गुर्व्वादिशापादेवाप्रहर्षणः ।५।
सदा स्तम्भितरेतास्तु रतिस्तब्धः ६ स ईर्षकः ॥
दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते । ७ ।
बहुस्त्रीसेवनाज्जातविरसः सेव्यकः स्मृतः ॥८॥
प्रत्यक्प्रहत्तवीर्य्यो यो विसर्गसमये भवेत् ।
आक्षिप्तबीजः स ज्ञेयो ९ मोघबीजस्तु स स्मृतः ॥
धृष्टस्त्रीसन्निधानादेर्य्यो भवेत् पतिध्वजः ।१०।
अत्र शालीनलक्षणं पतितम् ॥ ११ ॥
परस्यामेव यस्यास्ति पुंस्त्वं सोऽन्यापतिर्म्मतः १२
वक्त्र एव तु यः कुर्य्यान्मैथुनं स मुखेभगः ॥१३॥
वातरेता विसर्गे यो वातं लिङ्गेन मुञ्चति ।१४
कुम्भीकः स तु यो नार्य्याः पायावेव प्रवर्त्तते ॥
१५ ॥
अविकारिध्वजः षण्डो १६ नष्टो रोगादशुक्रकः ।
१७ ।
शुक्रप्राग्ध्वजोच्छ्रायी आसेव्यः १८ ससुगन्धिकः ॥
यो योनिसेफसोर्गन्धमाघ्राय लभते बलम् ।१९
षण्ढः स्त्रीतुल्यवाक्चेष्टः स्त्रीधर्म्मा छिन्नलिङ्गकः ॥" २० ॥
इति वाचस्पतिकृतस्मृतिरत्नावल्यामुद्वाहरहस्यविकाशः ॥ तद्दर्शनस्पर्शनयोः प्रायश्चित्तं यथा,—
"नास्तिकज्ञानविद्विष्टान् वीरहीनां तथा स्त्रियम्
देवतापितृसच्छास्त्रयज्ञमन्त्रादिनिन्दकैः ॥
कृत्वा तु स्पर्शनालापं शुद्ध्येतार्कावलोकनात् ।
अवलोक्य तथोदक्यामन्त्यजं पतितं शवम् ॥
विधर्म्मिसूतिकाषण्ढविवस्त्रान्त्यावसायिनः ।
सृतनिर्य्यातकांश्चैव परदाररताश्च ये ॥
एतदेव हि कर्त्तव्यं प्राज्ञैः शोधनमात्मनः ।
अभोज्यसूतिकाषण्ढमार्ज्जाराखुश्वकुक्कुटान् ॥
पतितापविद्धचाण्डालमृतहारांश्च धर्म्मवित् ।
संस्पृश्य शुध्यति स्नानादुदक्याग्रामशूकरौ ॥"
इति मार्कण्डेये सदाचाराध्यायः ॥

षण्नाड़ीचक्रं, क्ली, ( षड्विधं नाड़ीचक्रम् । ) नराणां जन्मादिषण्नक्षत्रघटितचक्रविशेषः । यथा,—
"जन्माद्यं कर्म्म ततोऽपि दशमं सांहातिकं षोड़शभम् ।
समुदायमष्टादशभं विनाशसंज्ञं त्रयोविंशम् ॥
आद्यात्तु पञ्चविंशं मानसमेवं नरः षड्भः स्यात् ॥"*॥
तेषां फलम् ।
"इहादेहार्थहानिः स्याज्जन्मर्क्षे उपतापिते ।
कर्म्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे ॥
मूर्त्तिद्रविणबन्धूनां हानिः सांहातिके तथा ॥
सन्तापे सामुदायिके मित्रभृत्यार्थसङ्क्षयः ।
वैनाशिके विनाशः स्याद्देहद्रविणसम्पदाम् ॥"
इति ज्योतिस्तत्त्वम् ॥

षण्मास्यः, त्रि, (षण्मासे भवः । षण्मास + "षण्मासात् ण्यच्च ।" ५ । १ । ८३ । इति यत् ।) षाण्मास्यः । इति सिद्धान्तकौमुदी ॥

षण्मुखः, पुं, (षट् मुखानि यस्य ।) कार्त्तिकेयः । इति हलायुधः ॥ (यथा, महाभारते । ३ । २३१ । १६ ।
"त्वं क्रीड़से षण्मुख कुक्कुटेन
यथेष्टनानाविधकामरूपी ॥")
षट्संख्यकवदने, क्ली । तद्वति, त्रि ॥

षण्मुखा, स्त्री, (षट् मुखानीव रेखा यस्याम् ।) षड्भुजा । इति राजनिर्घण्टः ॥

षत्वं, क्ली, (षस्य भावः । ष + त्व ।) मूर्द्धन्यषकारस्य भावः । यथा । णत्वषत्वे । इति मुग्धबोधव्याकरणम् ॥

षद, ऌ ज श्री श विषादे । शरणे । गतौ । इति कविकल्पद्रुमः ॥ ( तुदा०-पर०-सक०-विषादे अक०-अनिट् ।) ऌ, असदत् । ज, सादः सदः । श्री असात्सीत् । श, सीदती सीदन्ती । विषाद आकुलीभावः । सीदति राधा रासगृहे । शरणं हिंसा । इति दुर्गादासः ।

षद, क गतौ । आङ्पूर्व्वोऽयम् । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) मूर्द्धन्यादिः । क, आसादयति । इति दुर्गादासः ॥

षन, सम्भक्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) सम्भक्तिः सेवनम् । सनति गुरुं लोकः । इति दुर्गादासः ।

षन, द ञ उ दाने । इति कविकल्पद्रुमः ॥ (तना०-उभ०-सक०-सेट् । क्त्वावेट् ।) द ञ, सनोति सनुते । उ सनित्वा सत्वा । इति दुर्गादासः ॥

षम्च, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) सच्चति । इति दुर्गादासः ॥

षन्ज, श्री ञि सङ्गे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) श्री, असाङ्क्षीत् । ञि, सक्तोऽस्ति । सजति वपुषि वासः । इति दुर्गादासः ॥

षप, सम्बे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) सपति । असीषपत् । सम्बः सम्बन्धः । इति दुर्गादासः ॥

षम, वैक्लव्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) वैक्लव्यं विह्वलीभावः ।
"समन्ति यद्वियोगेन सीमन्तिन्यः स्मरातुराः ।"
इति दुर्गादासः ॥

षम, त् क वैक्लव्ये । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-अक०-सेट् ।) सिसमयिषति । इति दुर्गादासः ॥

षम्ब, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) सम्बति । इति दुर्गादासः ॥

षर्ज्ज, अर्ज्जने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् ।) सिषर्ज्जयिषति । सर्ज्जति धनं लोकः । इति दुर्गादासः ॥